# Shatarchanakrita Shiva Stuti

# શતર્ચનકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Shatarchanakrita Shiva Stuti

File name : shivastutiHshatarchanakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 489-509|| See corresponding nAmAvalI

Latest update : May 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 12, 2024

*sanskritdocuments.org*

# શતર્ચનકૃતા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે)
શતર્ચન ઉવાચ -
શ્રીમન્મહેશવિભવે વૃષભધ્વજાય
ધ્વસ્તાન્ધકાય મકરધ્વજદાહકાય ।
દમ્ભાપહાય ગરુડધ્વજપૂજિતાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૮૯॥

પાશાપહાય પશુપાશવિમોચકાય
પઞ્ચાનનાય પરમાદ્ભુતવિક્રમાય ।
પારાય પાલિતસુરાસુરમાનવાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૦॥

માયાપહાય મકરન્દરસાપહાય
માનપ્રદાય મધુરાય મહેશ્વરાય ।
માનાતિગાય મદમોહવિવર્જિતાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૧॥

મુક્તિપ્રદાય મુનિમાનસમન્દિરાય
મુક્તાકલાપકલિતામલકુન્તલાય ।
મુગ્ધાનનાય મુદિતાય મુકુન્દગાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૨॥

સર્વોત્તમાય સકલાય સમાશ્રયાય
સર્ગસ્થિતિપ્રલયકારણકારણાય ।
સત્યપ્રિયાય સરસાય સમઙ્ગલાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૩॥

ભદ્રાય ભવ્યવિભવાય ભવૌષધાય
ભસ્મપ્રભાસમભિભાવિતભૂષણાય ।

અર્કેન્દુવહ્નિનયનાય ગણપ્રિયાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૪॥

ભવ્યાય ભવ્યભગનેત્રવિદારકાય
ભાગ્યાસ્પદાય ભવતાપવિનાશકાય ।
ભક્તાભિવાઞ્છિતવિચિત્રફલપ્રદાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૫॥

ભોગીન્દ્રભોગિમણિરાજિતકન્ધરાય
ભોગસ્ફુરન્મરકતોજ્જ્વલકુણ્ડલાય ।
ભોગાનુયોગવિકસન્મકુટપ્રભાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૬॥

ભૂતાધિપાય ભુજગાધિપકઙ્કણાય
ભૂતપ્રિયાય ભુવનસ્થિતિકારણાય ।
ભૂભૂધરપ્રભૃતિભૂતગણોદરાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૭॥

દિવ્યાય દિવ્યચરિતાય દિગમ્બરાય
દિવ્યામ્બરાય દિતિજાનલશામકાય ।
દીનાર્તિહાય દિનનાથનિષેવિતાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૮॥

સોમાય સોમરુચિરઞ્જિતશેખરાય
સોમાગ્નિભાનુવિતતામલલોચનાય ।
સોપેન્દ્રચન્દ્રવિધિવન્દિતપાદુકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૪૯૯॥

કાલાન્તકાય કમનીયજટાધરાય
કાલાય કાલવિજયાય કલાધરાય ।
કલ્યાણદાય કનકાચલકાર્મુકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૦॥

પુણ્યાય પુણ્યહૃદયાય પુરાતનાય
પૂતાય પૂતજનચિન્તિતસત્ક્રિયાય ।
પુણ્યપ્રિયાય પુરકાનનપાવકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૧॥

વિશ્વાધિકાય વિધિવિષ્ણુવિધારકાય
વિત્તાધિપાય વિબુધાબુધસર્જકાય ।
વિસ્તારદાય વિજયાય વિશોધકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૨॥

નિત્યાય નિત્યનિરવદ્યગુણોજ્જ્વલાય
નીતિપ્રદાય નિયતાય નિવૃત્તિદાય ।
નીહારશૈલનિલયાય નિયામકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૩॥

નિર્ધર્મકાય નિગમાગમનિશ્ચિતાય
નિર્ણીતવસ્તુનિચયાય નિરામયાય ।
નિર્ધૂતપાતકહિતાય નિરઞ્જનાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૪॥

મૃત્યુઞ્જયાય મૃતિકાલવિવર્જિતાય
મૃદ્ધેમરત્નરજતાકરવૃદ્ધિકાય ।
મૃલ્લિઙ્ગપૂજકમનોરથપૂરકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૫॥

ગાનપ્રિયાય ગતિર્નૃત્તવિશારદાય
ગાથામયાય ગજકૃત્તિવરચ્છદાય ।
ગમ્યાગમાય ગગનાઙ્ગણનર્તકાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૬॥

દાન્તાય દાનનિપુણાય દયામયાય
દારિદ્ર્યદુઃખવિપિનૈકદવાનલાય ।
દાનાય દાનરહિતાય દવપ્રિયાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૭॥

યજ્ઞાય યજ્ઞપુરુષાય યશોમયાય
યજ્ઞાદિકર્મફલદાય યતિપ્રિયાય ।
યજ્ઞપ્રિયાય યજનાદિયતાશ્રયાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૮॥

શ્રીવિષ્ણુનેત્રકમલાર્ચિતપાદુકાય

શ્રીસેવિતાદ્રિતનયાતનુસંયુતાય ।
શ્રીભૂરુહારુણનવચ્છદપૂજિતાય
ભાલેક્ષણાય ભગવન્સતતં નમસ્તે ॥ ૫૦૯॥

- -

કશ્યપ ઉવાચ -
ઇતિ સ્તુત્વા મહાદેવં તં પ્રણમ્ય શતર્ચનઃ ।
ભૂયો રુદ્રેણ તુષ્ટાવ સૂક્તૈરન્યૈશ્ચ શામ્ભવૈઃ ॥ ૫૧૦॥

તતઃ શિવપ્રસાદેન જીવન્મુક્તઃ શતર્ચનઃ ।
પુનઃ કર્તું સમારેભે તપો ઘોરતરં મુને ॥ ૫૧૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શતર્ચનકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૪૮૯-૫૧૧॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 489-511 ..

Notes:
Śatarcana શતર્ચન eulogizes Śiva શિવ, as a result of which Śiva શિવ renders him Jīvanamukta જીવનમુક્ત.

The Śatarcanakṛtā Śivastutyāntargate ŚivaNāmāvaliḥ શતર્ચનકૃતા શિવસ્તુત્યાન્તર્ગતે શિવનામાવલિઃ that has been derived from this Stuti સ્તુતિઃ can be referred to from the link given below.

Encoded and proofread by Ruma Dewan

---

*Shatarchanakrita Shiva Stuti*
pdf was typeset on May 12, 2024

Please send corrections to *sanskrit@cheerful.com*